# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- आचार्य-१ (SEM-1) | प्रश्नपत्र-५ | गुणा: - ७० |
| विषय:- धर्मशास्त्रम् | CE411 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०९/१२/२०१६ | सन्दर्भग्रन्थ: - मनुस्मृति: ( १ त: ६ अध्याया: ) | |

**॥ प्रथमान्विति: ॥**

**प्र-१ अधोलिखितयो: द्वयो: कस्यचिदेकस्य सन्दर्भप्रसङ्गनिरूपणपूर्वकं भावार्थो लेख्य: ।** ०४

१. यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वे निमीलति ॥

२. युगपत्तु प्रलीयन्ते यदा तस्मिन्महात्मनि ।
तदाऽयं सर्वभूतात्मा सुखं स्वपिति निर्वृत: ॥

**प्र-२ अधोलिखितयो: एकस्य विस्तारेण उत्तरं लेख्यम् ।** १२

१. जगदुत्पत्तिवर्णनम् । २. नारायणादुत्पत्तिवर्णनम् ।

**प्र-३ अधोलिखितेषु द्वयो: टिप्पणी लेख्या ।** ०४

१. ब्रह्मण: स्वरूपम् । ३. महाप्रलयस्वरूपम् ।
२. कालादिसृष्टि: ।

**॥ द्वितीयान्विति: ॥**

**प्र-४ अधोलिखितयो: द्वयो: सन्दर्भप्रसङ्गनिरूपणपूर्वकं भावार्थो लेख्य: ।** ०५

१. तप: परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥

२. अध्यापनमध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत् ॥

३. भूतानां प्राणिन: श्रेष्ठा: प्राणिनां बुद्धिजीविन: ।
बुद्धिमत्सु नरा: श्रेष्ठा: नरेषु ब्राह्मणा स्मृता: ॥

**प्र-५ टिप्पणी लेख्या । ( द्वे )** ०६

१. चतुर्युगप्रमाणम् । ३. मनुस्मृते: महत्त्वम् ।
२. ब्राह्मणस्य कर्माणि । ४. नृपधर्मा: ।

**प्र-६ अधोलिखितेषु चतुर्णां लघूत्तराणि लिखत ।** ०४

१. मनुस्मृते: प्रथमाध्याये कति श्लोका: सन्ति ?
२. कति वर्षात्मकं देवानां युगमुच्यते ?
३. क: परमो धर्म: ?

४. ब्रह्मणमुखात् कस्योत्पत्तिः जाता ?

५. मनुस्मृतिः इत्यत्र कः समासः ?

६. मनुस्मृतेः प्रथमाध्यायस्य नाम किम् ?

**॥ तृतीयान्वितिः ॥**

**प्र-७ अधोलिखितयोः द्वयोः श्लोकयोः व्याख्या कार्या । ०८**

१. आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रिय ।
भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्धते ॥

२. दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥

३. नाभिनन्देत मरणं नाभिवन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशं मृतको यथा ॥

**प्र-८ कापि एका टिप्पणी लेख्या । ०३**

१. वानप्रस्थनियमाः ।

२. मुक्तलक्षणम् ।

**प्र-९ प्रदत्तप्रश्नेषु चतुर्णां लघूत्तराणि लिखत । ०४**

१. मनुस्मृतेः षष्ठाध्यायस्य नाम किम् ?

२. कति आश्रमाः ? के च ते ?

३. धर्मस्य कति लक्षणानि ?

४. मनुस्मृतौ कति अध्यायाः सन्ति ?

५. कः अहोरात्रे विभजते ?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० अधोलिखितयोः द्वयोः भावार्थो लेख्यः । ०४**

१. ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥

२. धृतिः श्रमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

३. यथा नदीनदाः सर्वे सागरे यान्ति संस्थितम् ।
तथैव श्रमिणः सर्वे गृहस्थे यान्ति संस्थितम् ॥

**प्र-११ अधोलिखितयोः एकस्य विस्तरेण उत्तरं लेख्यम् । १२**

१. चत्वार आश्रमाः ।

२. मोक्षसाधककर्माणि ।

३. इन्द्रियनिग्रहः ।

**प्र-१२ अधोलिखितयोः द्वयोः टिप्पणी लेख्या । ०४**

१. सर्वाश्रमफलम् ।

२. वेदसंन्यासिकानां कर्म ।

३. भिक्षाकालः ।

---